National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(61): 117-119
© 2025 NJHSR
www.sanskritarticle.com

**मानु-दासः**
गवेषिका,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः, अन्ध्रप्रदेशः, भारतवर्षम्

**Correspondence:**
**मानु-दासः**
गवेषिका,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः, अन्ध्रप्रदेशः, भारतवर्षम्

# श्रीवेङ्कटरमणविरचिते कमलाविजयनाटके मानविकता नैतिकता च

**मानु-दासः**

**प्रबन्धसंक्षेपः-**

नैतिकया खलु मानवजीवनस्य मूलमिति। मानवजीवने नैतिकता मानविकता अत्यावश्यका अस्ति। न केवलं प्राचीने काव्ये एषा दृश्यते, आधुनिके काव्ये नैतिकता मानविकता दरीदृश्यते। मानवस्यायं भावो मानवता। मानवता मानविकता मनुष्यत्त्वं तस्य नामान्तरमस्ति। मानवताया विषयस्तावद् मानवतावादः। मानवभावसमन्वितो जीव एव प्रकृतो मानवः। मनोर्वंशभूते सत्यपि प्रतिजनः स्वस्य भावोऽयं रक्षितुमसमर्थो भवति। मनोर्वंशभूते असत्यपि अर्थाद् मानवेरतप्राणिनो मानवस्यायं भावः प्रकाशयितुं समर्थो भवति। मानवेन सह मानवतायः सम्बन्धो न समवायोऽनित्येव। स्थितिरेयं प्रायशोऽस्माभिर्दरीदृश्यते। तदर्थं मानवतारहितान् मानवान् वङ्गभाषया अमानुषेति कथ्यते। नैतिकता जीवनयात्रायां अवश्यका। एकम् आधुनिकं काव्यं वेङ्कटरमणविरचितं कमलाविजयनाटकमिति। यद्वा भवतु अस्मिन् काव्ये आवश्यका नैतिकता मानविकता कीदृशः अस्ति तदत्र उपस्थाप्यतेति।

**सूचकशब्दाः-** मानवता, मानविकता, नैतिकता, कमला, श्रीनाथः।

**मूलप्रबन्धः**

- **भूमिका**

मनोरपत्यं पुमानिति व्युत्पत्या मानवोऽयं शब्दो निष्पद्यते। किन्तु मानवोऽयं तदैव भवेद्यदा तस्मिन् कोऽपि भावो विद्यतेतमाम्। मानवस्यायं भावो हि मानवतेति तथामानवस्य सद्धर्मविशिष्टो भावो हि मानवतेति गीयते। वयं मानवा क्षमानिष्ठासभ्यविनम्रत्वशिष्टाचारकारुण्यादिगुणयोगादेव। मानविकतामृते वयं पशुभिः समानाः। मानवता मानविकता मनुष्यत्त्वंच तस्य नामान्तराणि। मानवीयभावसमन्वितो जीव एव प्रकृत्या मनुष्यपदवाच्यः। किन्तु एते गुणाः सम्मिलिततया सर्वेषु मानवेषु दुर्लभा दृश्यन्ते। केषुचिन्महामानवेषु एतेषां गुणानां समवायो लक्ष्यते। मनोर्वंशभूते सत्यपि प्रतिजनं स्वस्य भावमिमंन रक्षितुमलम्। मनोर्वंशभूतेऽसत्यपि अर्थाद् मानवेरतप्राणिनो मानवस्येमं भावं प्रकाशयितुं समर्था भवन्ति। स्थूलदृष्ट्या मानवेन सह मानवताया सम्बन्धो न समवायः, परमनित्यः।तथाहि सर्वेषु मनुजेषु प्रायशोऽस्माभिर्दरीदृश्यते मानवताभावः। तदर्थं मानवधर्मरहिता मानवा वङ्गभाषया अमानुषेति कथ्यन्ते।

सूक्ष्मदृष्ट्या तु मानवेन सह मानवताया सम्बन्धः नित्य एव। हस्तपादादिसमन्वितो जीवो न भवतिसर्वदा मनुष्यपदवाच्यः। मनुष्यनामके प्राणिविशेषे मनुष्यत्वं मानविकता वेति प्रधानम् अवच्छेदकधर्मरूपम्। मानवतेयं यस्मिन् विद्यते स चतुष्पदः पुच्छयुक्तश्चेति भवति चेदपि मानवः। मानः अर्थात् बुद्धेः समुन्नतिः, हुष् अर्थात् विवेचनाशक्तिः अस्ति येषां ते खलु मानवाः।मानवताया विषयस्तावन्मानवतावादः।

मानवतेयं क्वचिन्मानवे प्रकाशिता क्वचिच्चाप्रकाशितादृश्यते। सा दशा न केवलम् इदानीन्तनकाले चापि प्राचीने काले अस्माभिर्दृश्यते। यथा– मानवताया अभावाद् महाभारतप्रसिद्धदूर्योधनादेः विनाशो लक्षणीयः।

विज्ञानस्य प्रयुक्तिविद्यायाश्च बलेनासाध्यं साधयति मनुष्यः। कदाचित् भगवतः शक्तिं तिरस्कृत्यात्मानं स सर्वशक्तिमानिति मन्यते। वस्तुवादप्रत्ययीसभ्यतायाः कृत्रिमालोकेनान्धः सन् स्वकर्तव्यं विस्मरति सः।

परधर्मानुष्ठानं परानुकरणञ्च सुसभ्यतायाः परिचायकमिदानीम्। अन्धानुकरणस्य फलं सर्वत्र परिदृश्यते समाजे। ह्यसो भवत्यनुदितं मानवतावादः। मुमूर्षं जनं प्रति विस्मृतकर्तव्यो मूढः पीडितार्थं प्रचारयति प्रसारयति च वैद्युतिकमाध्यमेन। कुत्राऽगच्छत् मानवो धर्मः? केन कथम्वा विखण्डिता मानवता। कथं संरक्षणीयं मनुष्यत्वम्? किं पुनर्मानवो धर्मः? किं शास्ति शास्त्रम्? किं शास्त्रे मानवतावादस्य शिक्षा नास्ति?

वर्तमाने समाजे मानवता अत्यावश्यका। न केवलं मानवता, नैतिकता, नैतिकमूल्यवोधः अतीव गुरुत्वपूर्णः अस्ति। आधुनिके काले विवेकवीरेण स्वामिना विवेकानन्देन कथितं कर्म एव श्रेष्टमिति। परन्तु कर्म न केवलं कर्म, तस्य विशेषार्थः अस्ति। धर्मयुक्तं कर्म श्रेष्टमिति वक्तुं शक्यते। तर्हि प्रश्नः धर्मः कः? वयं जानिमः चतुर्वर्गेषु एकः खलु धर्मः। अत्र विशेषेण धर्मः उपस्थाप्यते।

- **कमलाविजयनाटकस्य मानविकता नैतिकता**

नैतिकता मानवव्यवहारस्य निर्णयस्य च मानकं भवति यत् किं शुभं दुष्टं वा, उचितं वा अयोग्यं वा इत्यादीनि न्याययति। सा समाजस्य नियमानाम्, मूल्यानां, आदर्शानां च आधारेण भवति। सामान्यतया नैतिकता समाजे केचन स्वीकृताः नियमाः सिद्धान्ताः वा निर्दिशन्ति ये मानवव्यवहारं नियन्त्रयन्ति, स्वस्थसमाजस्य निर्माणे च साहाय्यं कुर्वन्ति। अत्र नाटकस्य केवलमेव पात्रद्वयस्य चरित्रे नैतिकता मानवता उपस्थाप्यते

- **श्रीनाथस्य नैतिकता**

श्रीनाथः कमलविजयनाटके महान् पात्रः अस्ति। अस्मिन् नाटके तस्य नैतिकतायाः दृश्यं वयं यथार्थतया प्रभाविताः। नाटकस्य प्रतिद्वन्द्वी शीर्णाक्षः स्वपरिचयं गोपयित्वा श्रीनाथेन सह मृगयां करोति, अनन्तसेनाः श्रीनाथस्य नगरे विविधप्रकारेण आक्रमणं कुर्वन्तः श्रीनाथस्य मित्रं प्रत्यययितुं प्रयतते। श्रीनाथः शीर्णाक्षस्य विषये जानाति स्म यत् शीर्णाक्षः अनन्तनीकेन सह मिलित्वा राम्यक्कगरस्य हानिं कर्तुम् इच्छति परन्तु सः तस्य मैत्रीविषये न जानाति। यदा शीर्णाक्षः जनैः गृहीतः तदा जनाः तस्य वधस्य उपक्रमं कृतवन्तः। ततः श्रीनाथः शीर्णाक्षम् अतिथिरूपेण मुक्तवान्। शिरनाक्षमब्रवीत्-

'न भेतव्यं न भेतव्यं, मद्भूहागतमतिथं ते न बाधेरन् (इति द्वारं निर्दिशन्) गच्छ, तत्र गच्छ, इदमेव काननस्य द्वारं, निर्गच्छ, प्रयाहि, अद्यप्रभृति तवाहमरातिः संवृत्तः।'[1]इति

श्रीनाथस्य अनुपस्थितौ शीर्णाक्षः कमलाकं प्रत्ययितवान् यत् श्रीनाथः वार्तालापं कृत्वा विजयं न प्राप्स्यति-

"बालकैः क्रीडार्थं सिन्धुतटे निर्मितं सैकतायतनं तरङ्गैकमात्रस्पर्शेन नश्यति किल।
सर्वं विदितं भवति रम्यायाः। इदानीं श्रीनाथस्य न लेशोपि विजयावकाशः।"[2] इति

एवं शीर्णाक्षः कमलायाः मनसि भयं सृजति, श्रीनाथस्य कृते अनन्तनीकं प्रार्थयतु इति वदति, श्रीनाथं विषये अस्मिन् किमपि वक्तुं निषेधं करोति। यतः यदि शिर्णाक्षः जानाति, तर्हि सः कदापि कमलाकं अनन्तनीकं मिलितुं न ददाति। सः कदापि तस्य पराजयं न स्वीकुर्यात्। कार्यमिदं तस्य धर्मविरुद्धं सिद्धान्तविरुद्धं वेति। सः क्षत्रियः, युद्धः खलु तस्य धर्मः। सः युद्धात् पूर्वं पराजयं न स्वीकुर्यात्।

अत्र धर्मनीतियोगः दृश्यते। अत्र धर्मः नैतिकता च अविच्छिन्नरूपेण सम्बद्धौ स्तः। विशेषतः प्राचीनकाले धर्मस्य नैतिकतायाः च पृथक् पृथक् अभिव्यक्तिः अतीव कठिना आसीत्। यथा मनुसंहितायां चतुर्वर्णधर्मोक्तमिति पश्यामः। यथा क्षत्रियधर्मः युद्धं पूजनम् इत्यादयः अत्र धर्मस्य अर्थः ईश्वरस्य पूजा वा स्तुतिः वा न भवति, अत्र धर्मस्य अर्थः स्वकर्तव्यः सिद्धान्तः वा। तदा स्वकर्तव्यनिर्वहणं धर्मः इति कथ्यते, नैतिकता इत्पि कथ्यते। कर्तव्यविरुद्धं किमपि करणं अधर्मं वा अनैतिकं वा कथ्यते। प्राचीनकाले धर्मस्य नैतिकतायाश्च पृथक्करणं बहुदुष्करम् आसीत्।

अत्र वयं नाटकस्य प्रथमाङ्कस्य तृतीये दृश्ये श्रीनाथस्य नैतिकतायाः उदाहरणान्तरं पश्यामः। कमला श्रीनाथं वदति यत् सा देवीगृहं पूजादिकं कर्तुं गच्छति, यदि तस्याः विलम्बः भवति तर्हि श्रीनाथः तस्याः अनुसरणं कर्तव्यमिति।

अत्र श्रीनाथस्य पतित्वेन कर्तव्यं कमलायाः पालनं तस्याः शुभाशुभयोः दृष्टिदानं च। यतः कमला श्रीनाथं किञ्चित् संकटं भयभीतः अत्र आगन्तुं वदति। श्रीनाथः कर्तव्यपरायणः कमलायाः वचनं तत्र गच्छति।

- **कमलायाः नैतिकता**

कमला नैतिकतायाः मूर्तरूपः अस्ति। नाटके वयं पश्यामः यत्, शीर्णाक्षः बहुवारं कमलाकं प्रस्तावयति, परन्तु कमला कदापि शीर्णाक्षं प्रति आकृष्टः न भवति यतोहि कमला स्वपतिं श्रीनाथं प्रेम्णा पश्यति, कदापि तस्य विश्वासघातं कर्तुम् न इच्छतीति।

कमला शीर्णाक्षस्य निर्देशानुसारं अनन्तनीकं मिलितुम् अगच्छत्। अत्र कमला श्रीनाथात् सत्यं गोपयति स्म किन्तु सा श्रीनाथस्य प्राणरक्षणार्थं तत् कृतवती। परन्तु कमला स्वप्नमपि न शक्तवती यत् सत्यस्य गोपनं श्रीनाथस्य मृत्योः कारणं भविष्यति।

श्रीनाथस्य मृत्योः अनन्तरं कमलया देवीगृहं शरणं गतम्। तत्र शीर्णाक्षस्य दूतः शीर्णाक्षेण सह विवाहार्थं कमलाकं बहुवारं प्रस्तावम् अयच्छत्। कमला कदापि तत् प्रस्तावम् अङ्गीकृतवान्। अन्ते शीर्णाक्षस्य राज्याभिषेकदिने पुनः दूतः आगत्य कमलायाम् विवाहस्य प्रस्तावम् अयच्छत्। कमला शीर्णाक्षस्य विवाहप्रस्तावम् अङ्गीकृतवती।

अत्र कमला इत्यस्याः अभिप्रायः आसीत् यत् शीर्णाक्षं सर्वथा राजमुकुटं न धारयतु इति। अतः सा तं दूतं प्रेषितवती यत् यदि शीर्णाक्षः राज्याभिषेकात् पूर्वं कमलया सह मिलति तर्हि सा तस्य

विवाहं करिष्यति तथा च कमला एवम् अकरोत्। राजमुकुटं धारयितुं उत्सुकं शीर्णाक्षं विषं दत्त्वा तं मृत्यवे प्रेरितवती कमला।

यदि कमला इच्छति स्म तर्हि अत्रैव विवाहं कृत्वा तस्य राज्ञीं भूत्वा तस्य अपारधनस्य स्वामिनीं भवितुम् अर्हति, परन्तु सा तन्न कृतवती।

कमलाविषयनाटके धार्मिकचिन्ता नैतिकचिन्ता आलोचिता। धार्मिक-चिन्तायां जन्मन्तरवादः मूर्तिपूजा वहुदेवतावादः समुपलभ्यते। आधुनिककाव्ये यद् वर्तते धर्मविषये तत् सर्वमत्र काव्ये दृश्यते। नैतिकता काव्येऽस्मिन् सावलिला दृश्यते। अधिकेषु पात्रेषु नैतिकया उपलब्धा दृश्यते। धार्मिकता-नैतिकताविषये आधुनिके काव्ये यद् दृश्यते तत् सम्यक् उपलभ्यते अस्मिन् काव्ये।

- **उपसंहृतिः**

वयं पश्यामः यत्, मानवजीवने मानवता नैतिकता प्रासङ्गिका अस्ति। वर्तमाने काले अस्या नैतिकताया मानवतायाः अभावः दृश्यते, तदर्थं अस्याः दृढप्रकाशनय सचेष्टः स्यात्। नैतिकतायाः मूल्यं दिनं दिनं वर्धतेतराम्। अस्मिन् काव्ये पात्रद्वयचरित्रे नैतिकता उपस्थापिता। कविना सुकौशलेनापि नैतिकतायादृष्टान्तः वर्तमानसमाजे प्रदत्तः। यद्वा भवतु मावनमनसि नैतिकता जागरुका भवतु इति आशा वर्ततेति शिवम्।

**ग्रन्थसन्दर्भसूची**


- श्रीवेङ्कटरमणविरचितम् कमलाविजयनाटकम्
- *अमरकोषः अमरसिंहस्य* – सम्पा. गुरुनाथ विद्यानिधिभट्टाचार्य्य, संस्कृत पुस्तक भाण्डार, कलकाता, १४१७ वङ्गाब्द।
- आप्ते, विमान शिवराम, *'The Students English Sanskrit Dictionary'* - दिल्ली, तृतीयसंस्करण, सप्तदशदशमुद्रण ,२०१४
- चट्टोपाध्याय, ऋता, *'आधुनिक संस्कृत साहित्य'* छोटगल्प ओ नाटक – प्रोग्रेसिभ पावलिसार्स, कलिकाता, २०१२
- त्रिपाठी, राधावल्लभ – *'संस्कृत साहित्य बिशवीं शताब्दी'*, राष्ट्रीय संस्कृत संस्थान, नइ दिल्ली, १९९९
- दाश, नारायणदा, *'संस्कृतसाहित्ये पश्चिमवङ्गस्यावदानम्'* – कथा-भारती, कलिकाता, २०१३
- वन्द्योपाध्याय, श्री हरिचरण– *बङ्गीय शब्दकोष* (प्रथम खण्ड, अ-न), साहित्य अकादेमि, नतुन दिल्ली, षष्ठ मुद्रण, २००४
- सेनः, शुभ्रजित्- *भारतवर्षे आधुनिकसंस्कृतसाहित्यम् : विहङ्गम-दृष्ट्या परिशीलनम्* (Modern Sanskrit Literature in India : A Bird's eye view), संस्कृतपुस्तकभाण्डारः, कोलकाता, प्रथम-संस्करणम्, २०१९


**पाद टिप्पणी**

[1]*कमलाविजयनाटकम्*, पृष्ठा-23

[2]*कमलाविजयनाटकम्*, पृष्ठा-21